"शशी दिवसधूसरो गलितयौवना कामिनी सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः । प्रभुर्धनपरायणः सततदुर्गतःसज्जनो नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे"॥ "अरुणे च तरुणि! नयने तव मलिनञ्च प्रियस्य मुखम् । मुखमानतञ्च सखि! ते ज्वलितश्चास्यान्तरे स्मरज्वलनः" ॥ अत्राद्येऽर्द्धे गुणयोर्यौगपद्यं द्वितीये क्रिययोः । उभयोर्यौगपद्ये यथा । "कलुषञ्च तवाहितेष्वकस्मात् सितपङ्केरुहसोदरश्रि चक्षुः । पतितञ्च महीपतीन्द्र! तेषां वपुषि प्रस्फुटमापदां कटाक्षैः ॥ "धुनोति चासिं तनुते च कीर्त्तिम्" इत्यादावैकाधिकरण्येऽप्येष दृश्यते ।

१२१ सम्बन्धातिशयोक्तिः "सम्बन्धातिशयोक्तिः स्यादयोगे योगकल्पनम्१ योगेऽप्ययोगसम्बन्धातिशयोक्तिरितीर्य्यते"२ च० "सौधाग्राणि पुरस्यास्य स्पृशन्ति विधुमण्डलम्"।१। "त्वयि दातरि राजेन्द्र! स्वर्द्रुमान्नाद्रियामहे" ।

१२२ सम्भवः "प्रभूतकारणालोकात् स्यादेवमिति सम्भवः । स विधौ१ वा निषेधे२ वा द्वये३ वा नद्वयेऽपि वा"४ स०क० क्रमेण यथा "त्वय्यादातुं जलमुपनते शार्ङ्गिणो वर्णचौरे न स्यात् सिन्धोः पृथुरपि ततो दूर भावात् प्रवाहः । प्रेक्षिष्यन्ते गगनगतयो न्यूनमावर्ज्य दृष्टीरेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम्" । अत्र उक्तरूपेण दृश्योभविष्यसीति विधेः सम्भाव्यमानत्वादयं विधिरूपसम्भवः अत्रैव पूर्व्वार्द्धे सिन्धुप्रवाहस्य पृथुत्व निषेधरूपसम्भवश्च एवंविधिनिषेधतदुभयानात्मकसम्भवयो रुदाहरणे मृग्ये ।

१२३ सम्भावनम् "सम्भावनं यदीदं स्यादित्यूहोऽन्यस्य सिद्धये" च०। "यदि त्रिलोकी गणनापरा स्यात्तस्याः समाप्तिर्यदि नायुषः स्यात् । पारेपरार्द्धं गणितं यदि स्याद् गणेयनिःशेषगुणोऽपि स स्यात्"।

१२४ सहोक्तिः "सहार्थस्य बलादेकं यत्र स्याद्वाचकं द्वयोः।सा सहोक्तिर्मूलभूतातिशयोक्तिर्यदा भवेत्" सा०द०। अतिशयोक्तिरत्राभेदाध्यवसायमूला कार्य्यकारणपौर्व्वापर्य्यविपर्य्ययरूपा च । अभेदाध्यवसायमूलापि श्लेषनिमित्ता अन्यथा च क्रमेणोदाहरणम् । "सहाधरदलेनास्या यौवने रागभाक् प्रियः" अत्र रागपदे श्लेषः । "सह कुमुदकदम्बैः काममुल्लासयन्तः सह घनतिमिरौघैर्धैर्य्यमुत्सारयन्तः । सह सरसिजपण्डैः स्वान्तमामीलयन्तः प्रतिदिशममृतांशोरंशवः सञ्चरन्ति" ॥ अत्रोल्लासादीनां सम्बन्धिभेदादेव भेदो न तु श्लिष्टतया ।

१२५ सामान्यम् "सामान्यं प्रकृतस्यान्यतदात्म्यं सदृशैर्गुणैः" । च० "मल्लिकाचितधम्मिल्लाश्चारुचन्दनचर्चिताः । अविभाव्याः सुखं यान्ति चन्द्रिकास्वभिसारिकाः ।

१२६ साम्यम् "द्वयोर्यत्रोक्तिचातुर्य्यादौपम्यार्थोऽवगम्यते । उपमारूपकान्यत्वे साम्यमित्यामनन्ति तत् । तदानन्त्येन भेदानां संख्यानं तस्य दुष्करम्,। दृष्टान्तोक्तिः प्रपञ्चोक्तिः प्रतिवस्तूक्तिरेव च । तत्रेवादेः प्रयोगेषु दृष्टान्तोक्तिं प्रचक्षते । इवादेरप्रयोगेषु प्रपञ्चोक्तिं मनीषिणः । वस्तु किञ्चिदुपन्यस्य न्यसनात् तत् सधर्म्मणः । साम्यप्रतीतिरस्तीति प्रतिवस्तूक्तिरुच्यते । तत्र क्रियाजातिगुणद्रव्ययोगादिहेतुके । साम्ये पूर्व्वादिभेदेन दृष्टान्तोक्तिर्विधीयते" स०क० ॥ तत्र क्रियानिमित्तम् "स्थितः स्थितामुच्चलितःप्रयातां निषेदुषीमासनबन्धधीरः । जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत्" ॥ इदं पूर्व्वम् । उत्तरं यथा । "रूपं तदोजस्वि तदेव वीर्य्यं तदेव नैसर्गिकमुन्नतत्वम् । न कारणात् स्वाद्बिभिदे कुमारः प्रवर्त्तितो दीप इव प्रदीपात्" । अन्यान्युदाहार्य्याणि ।

१२७ सारः "उत्तरोत्तरमुत्कर्षो वस्तुनः सार उच्यते" । च० "मधुरं मधु, पीयूषं तस्मात्, तस्मात् कवेर्वचः" ।

१२८ सूक्ष्मम् "संलक्षितस्तु सूक्ष्मार्थ आकारेणेङ्गितेन वा। कयापि सूच्यते भङ्ग्या यत्र सूक्ष्मं तदुच्यते"। सा०द०सूक्ष्मः स्थूलमतिभिरसंलक्ष्यः। तत्राकारेण यथा । "वक्त्रस्यन्दिस्वेदबिन्दुप्रबन्धैर्दृष्ट्वा भिन्नं कुङ्कुमं कापि कण्ठे । पुंस्त्वं तन्व्या व्यञ्जयन्ती वयस्या स्मित्वा पाणौ खड्गलेखां लिलेख" अत्र कयाचित् कुङ्कुमभेदेन संलक्षितं कस्याश्चित् पुरुषायितं रतं पाणौ पुरुषचिह्नखड्गलेखालिखनेन सूचितम् । इङ्गितेन यथा । "सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया । हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम्" ॥ अत्र विटस्य भ्रूक्षेपादिना लक्षितः सङ्केतकालाभिप्रायो रजनिकालभाविना पद्मनिमीलनेन प्रकाशितः ।

१२९ स्तोकोक्तिः "स्तोकोक्तिर्यत्र लोकोक्तिः स्यादर्थान्तरगर्भिता"। च० 'भुजङ्ग एव जानीते भुजङ्गाचरणं सखे' ।

१३० स्मरणम् "सदृशानुभवाद्वस्तुस्मृतिः स्मरणमुच्यते"। सा०द० "अरविन्दमिदं वीक्ष्य खेलत्खञ्जनमञ्जुलम् । स्मरामि वदनं तस्याश्चारुचञ्चललोचनम्" । स० कण्ठा० तु भेदो दर्शितः । "सदृशादृष्टचिन्तादेरनुभूतार्थवेदनम् । स्मरणं प्रत्यभिज्ञानस्वप्नावपि न बाह्यतः" । तत्र सदृशवस्तुदर्शन जन्यं स्मरणमुक्तोदाहरणे। अदृष्टहेतुकं यथा "मुनिसुताप्रणय-